# संस्कृतम्
# (309)

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

**निर्देशाः –** (i) अस्मिन् प्रश्नपत्रे द्वौ खण्डौ स्तः । खण्ड – क (केन्द्रिक पाठ्यक्रमः), खण्ड – ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः ।

(ii) खण्ड – क अनिवार्यः । अस्मिन् खण्डे 20 प्रश्नाः सन्ति ।

(iii) खण्ड – ख **एकः** एव वैकल्पिकः समाधेयः ।

(iv) खण्ड – क कृते 85 अङ्काः, खण्ड – ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः । अस्य कृते 15 अङ्काः निर्धारिताः ।

## खण्ड – क
## (केन्द्रिक पाठ्यक्रमः)

1 अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत – **6**

(क) राजते खलु कन्याकुमारी

(ख) अनन्तः ज्ञानसागरः

(ग) शल्यचिकित्साजनकः सुश्रुतः

2 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत – **1×4=4**

अथ किंचिद्दूरंगतेषु तेषु एकस्यवर्तिका अपतत् । सः अपिखनितुम् आरभत, रूप्यमयीं भूमिम् अलभत । अहोयथेच्छं रूप्यं स्वीकुरुत । नाग्रे गन्तव्यम् ।

**प्रश्नाः –**

(क) दूरं गतेषु तेषु किम् अभवत् ?

(ख) सः भूमिम् खनित्वा किम् अलभत ?

(ग) तौ अग्रे गन्तुं किमर्थं न वाञ्छन्ति ?

(घ) ते कियत् रूप्यं स्वीकर्तुम् उद्यताः आसन् ?

3 अधोलिखितानां प्रश्नानाम् उचितम् उत्तरं कोष्ठकात् चित्वा लिखत – 1×4=4

(क) कन्याकुमारी कस्यवधकारणात् पुण्यस्थलं जातम् ? (राक्षसस्य/बाणासुरस्य)

(ख) बकासुरस्य भक्षणाय एकदाकस्यवारः समायातः ? (ब्राह्मणस्य/शशकस्य)

(ग) कल्पनाचावलायाः विशिष्टा रुचिः कस्याम् आसीत् ? (वैमानिक्याम्/भौतिक्याम्)

(घ) मानवजीवनाय कीदृशं पर्यावरणम् अपेक्षितं भवति ? (स्वच्छम्/स्पष्टम्)

4 (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत – 1×2=2

(i) अतिलोभाभिभूतस्य चक्रं भ्रमति <u>मस्तके</u> ।

(ii) दक्षिणसमुद्रे शिलामयद्वीपे <u>विवेकानंदस्य</u> स्मारकं वर्तते ।

(ख) प्रश्नान् उत्तरत – 1×2=2

(i) सुश्रुतस्य ग्रंथस्य किं नाम अस्ति ?

(ii) 'न पुनः कदापि मांसं स्प्रक्ष्यामः' इति के प्रतिजानन्ति ?

5 एतत् कथनं कः कम्प्रति कथयति ? 2

(क) अलं सुप्तजनं प्रबोधयितुम् ? स्वयं प्रक्षालयावः ।

(ख) मर्षय भगवन्, 'अभूमिरेषा शापस्य' ।

6 अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – 2+2=4

(क) तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥

**प्रश्नद्वयम् –**

(i) सतां गेहे कति वस्तूनि न उच्छिद्यन्ते ?

(ii) सूनृता इति कस्य विशेषणपदम् ?

(ख) धनोपगूढं गगनं न तारा, न भास्करो दर्शनमभ्युपैति ।
नवैर्जनौघैर्धरणी वितृप्ता, तमोविलिप्तान दिशः प्रकाशः ॥

**प्रश्नद्वयम् –**

(i) गगने सूर्यस्य दर्शनं कदा न भवति ?

(ii) पृथ्वी कथं तृप्ता भवति ?

7 अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत – 2

(क) यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा ।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ॥

अन्वय :

यस्य वाङ्मनसी ________ सम्यक् गुप्ते च सर्वदा । स वै सर्वम् ________ फलम् अवाप्नोति ।

(ख) वहन्ति वर्षन्ति नदन्ति भान्ति, ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवंगाः ॥

अन्वय :

नद्यः वहन्ति, घनाः वर्षन्ति, मत्तगजाः ________ वनान्ताः भान्ति, प्रियाविहीनाः ध्यायन्ति, ________ नृत्यन्ति, प्लवंगाः समाश्वसन्ति ।

8 अधोलिखित पद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत – 2

(क) कदर्यं दानेन जयेत् ।

भावार्थः –

कृपणताभावं ________ दत्त्वा दूरीकुर्यात् ।

(ख) अनुव्रतः पितुः पुत्रः ।

भावार्थः –

पुत्रः ________ आज्ञाकारी स्यात् ।

9 'अ' स्तम्भस्य पद्यांशं 'ब' स्तम्भेन सह मेलयत – 2

| **स्तम्भ–'अ'** | **स्तम्भ–'ब'** |
|---|---|
| (i) दानं प्रियवाक्यसहितं | (क) विदुषा प्राज्ञमानिना |
| (ii) कुतस्तद्धनलुब्धानाम् | (ख) कोहन्ति करिणां कुलम् |
| (iii) कस्तूरी जायते कस्मात् | (ग) इतश्चेतश्च धावताम् |
| (iv) सचिवेनापनीतं ते | (घ) ज्ञानमगर्वं क्षमान्वितं शौर्यम् |

10 'हृदयपरिवर्तनम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत – 6

सहायतायै बिन्दव दत्ताः

**बिन्दवः**

यक्षाः, पञ्च, ब्राह्मणवेश धारिणः, मैत्रबलराज्ञः, राज्ये, विचरन्ति ते गोपालकेन, वने, वादितं, वंशीध्वनिं, श्रृण्वन्ति, वंशीवादकः गवां समीपे, आसीत् सर्वे, अग्रेगच्छन्, गोपालकः बोधिसत्त्वस्यराज्ये निर्भीक भावं, कथयति, राजा, तेषां, इच्छानुरूपं, मांसरुधिभोजनं यच्छति सर्वे हिंसांत्यजन्ति ।

11 अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – 1+1=2

(क) चेटी – आर्य मैत्रेय, भट्टिनी धूता त्वां शब्दापयति ।

विदूषकः – (उपसृत्य) स्वस्ति भवत्यै, एषआगतोऽस्मि ।

धूता – आर्य, प्रतीच्छ इमाम् ।

विदूषकः – किं नु इदम् ?

धूता – आर्य मैत्रेय, अहं खलु रत्नषष्ठीव्रतम् उपोषिता आसम् । तस्य कृते प्रतीच्छ इमां रत्नमालिकाम् । (निष्क्रामति)

विदूषकः – (सहर्षम्) स्वस्ति भवत्यै गमिष्यामि प्रियवयस्यं निवेदयामि ।

चारुदत्तः – मैत्रेय, कथं चिरयसि ?

विदूषकः – एषोऽस्मि गृहाण एताम् ।

चारुदत्तः – किमेतद् ?

विदूषकः – ते सदृशदारसंग्रहस्य फलम् (रत्नावलीं दर्शयति)

प्रश्नाः

(i) भट्टिनी धूता कं शब्दापयति ?

(ii) धूता कं व्रतम् उपोषिता आसीत् ?

(ख) संविद्यमानं नास्तीतिब्रूयादस्मद्विधः कथम् ।
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः ॥

प्रश्नाः 1×2=2

(i) 'अस्मद्विधः' इति शब्दः राज्ञः कं गुणं प्रकटयति ?

(ii) याचितः सन् दानशीलः नरः किं करोति ?

12 अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त प्रश्नान् उत्तरत –

(क) गद्यांशः

पर्यावरणस्य प्रथमं स्थानं भूमिः । पृथिव्यां ये पादपाः वीरुधो वनस्पतयो वा जायन्ते ते सर्वे क्षेमाय भवन्तु । यत्र तत्र निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति । एतानि न क्षीयन्ते, न क्लिद्यन्ते न वा नश्यन्ति अपितु वनस्पतीनां प्ररोहणे बाधां जनयन्ति ।

**प्रश्नाः –**

(i) पर्यावरणस्य प्रथमं स्थानं किम् ? 1

(ii) क्षेमाय के भवन्तु ? 2

(iii) कानि प्रदूषणं जनयन्ति ? 2

(ख) पद्यांशः

यः स्वाध्यायमधीतेऽब्दं विधिना, नियतः शुचिः ।
तस्य नित्यं क्षरत्येतत् पयोदधि धृतं मधु ॥

**प्रश्नाः –**

(i) स्वाध्यायं कथं भूत्वा कुर्यात् ? 1

(ii) कियत्कालं स्थिरो भूत्वा स्वाध्यायं कुर्यात् ? 2

(iii) यः स्वाध्यायं करोति तस्मै किं–किं क्षरति ? 2

13 मञ्जूषापदसहायतया 'वर्षा-ऋतुः' इति विषयमधिकृत्य दशवाक्यानि लिखत – 1×10=10

| मञ्जूषा |
| --- |
| मेघाः, वर्षाऋतौ, चतुर्दिक्षु, जलभारं, वहन्तः, शब्दं कुर्वन्ति, मयूराः नृत्यन्ति, जगति, सर्वत्र, मेघाः वर्षन्ति, नद्यः वेगेन वहन्ति, ग्रामेषु जलौधः, दृश्यते, सूर्यस्य, दर्शनं, मेघाच्छादनेन न भवति, वनेषु, उपवनेषु च, हरीतिमा, वर्षाऋतुः ऋतूनां राज्ञी । |

14 भवान् सुरेशः । भवताम् आवासक्षेत्रे जलापूर्तिः सुष्ठुतया न भवति । तदर्थं जलापूर्ति विभागं प्रति पत्रं लिखतु । 6

15 भवान् अवनीशः । भवतः मित्रं अशोकः । प्रतिदिनं प्रातः भ्रमणस्य लाभात् अधिकृत्य भवतोः मध्ये जातं संवादं चतुर्षु वाक्येषु लिखतु । 1×4=4

16 रेखांकितपदे सन्धिच्छेदं कुरुत – 1

(क) धनोपगूढं गगनं न तारा ।

(ख) निमज्जतीन्दोः किरणेष्विवाङ्कः ।

17 (क) रेखांकितपदे का विभक्तिः किं च मूलपदम् ? 2

मानो हि महतां धनम् ।

(ख) रेखांकितपदद्वयं लट्लकारे परिवर्त्य लिखत – 2

नूनम् इतः परं रत्नानि भविष्यन्ति ।

चक्रधरः सुखम् अनुभवन् अवदत् ।

18 कोष्ठकप्रदत्तेभ्यः शब्देभ्यः समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत – 1×4=4

(क) हिमालयस्य मध्यभागे ________ सञ्चरन्ति । (घन + उचित विभक्ति)

(ख) पृथिव्यां ________ क्षेमाय एव भवन्तु । (पादप + उचित विभक्ति)

(ग) ________ अशान्तिः बहुरोगान् जनयति । (मनस् + उचित विभक्ति)

(घ) अस्माकं ________ सुखमयंशान्तिमयं च भवतु । (जीवन + उचित विभक्ति)

19 यथानिर्दिष्टं कुरुत – 1×4=4

(क) यस्य वाङ्मनसी शुद्धे । (रेखांकितस्य विग्रहं कुरुत)

(ख) अस्माभिः कदापि लोभः न कर्त्तव्यः । (अव्ययं चिनुत)

(ग) एकदा नगरवासिनः तम् अकथयन् । (कर्मवाच्ये परिवर्तनं कुरुत)

(घ) सरोवरे स्नात्वा राजा वध्यशिलायाम् उपविष्टः । (प्रत्ययं चिनुत)

20 अधोलिखितवाक्ये एकम् अव्ययम् एकम् उपसर्गं च चित्वा लिखत – 2

(क) धनं च मदाय भवति ।

(ख) निद्रां विहाय प्लवंगाः प्रबुद्धाः भवन्ति ।

## खण्ड – ख

## वैकल्पिक–I
## (संस्कृतं संस्कृतिश्च)

**21** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत – **2**

| 'अ' | 'ब' |
|---|---|
| (i) भाति मे भारतम् | (क) राजेन्द्र मिश्रः |
| (ii) जानकीजीवनम् | (ख) रामभद्राचार्यः |
| (iii) इन्दिरागांधीचरितम् | (ग) सत्यव्रतशास्त्री |
| (iv) श्री भार्गवराघवीयम् | (घ) रमाकान्त शुक्लः |

**22** अधोलिखित प्रश्नान् उत्तरत –

(क) निम्नलिखित संख्यानां कृते संस्कृत पदानि लिखत – **2**
$10^2$, $10^4$, $10^9$, $10^{11}$

(ख) (i) श्रीपतिः कस्य विषयस्य ज्ञाता आसीत् ? **2**
(ii) तस्य ग्रंथस्य किं नाम अस्ति ?

(ग) 'गणितसारसंग्रहः' इति ग्रन्थः केन लिखितः ? **1**

(घ) 'जीवेम शरदः शतम्' इति कस्य शास्त्रस्य उद्देश्यमस्ति ? **2**
अस्य शास्त्रस्य सर्वप्रथमं प्रवर्तनं कः अकरोत् ?

**23** संस्कृतं भारोपीयभाषापरिवारस्य कस्याः शाखायाः भाषा अस्ति ? तस्य कति रूपे स्तः ? **2**

**24** (क) भारतीयसंस्कृतौ कति पुरुषार्थाः सन्ति ? के च ते ? **2**

(ख) विद्यारंभसंस्कारः शिशोः जन्मनः कस्मिन् वर्षे क्रियते ? **1**

(ग) श्रवणशक्तेः वृद्ध्यर्थं कः संस्कारः क्रियते ? **1**

## वैकल्पिक–II

## (प्रयोजनमूलक संस्कृतम्)

**21** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – **1×4=4**

(क) वेदानांबोधः ________ संस्कृतेन एव भवितुं शक्यते ।

(ख) सुश्रुतसंहिता ________ ग्रन्थः अस्ति ।

(ग) ब्रह्मगुप्तः ________ निर्मितवान् ।

(घ) संस्कृतविषयेण सह उत्तीर्णः कोऽपि स्नातकः ________ पदे सैनिकक्षेत्रे नियुज्यते ।

**22** अधोलिखित प्रश्नान् उत्तरत – **1×4=4**

(क) दूरदर्शनस्य 'डीडीज्ञानदर्शनम्' प्रतिसप्ताहं कति दिवसेषु संस्कृतकार्यक्रमं प्रसारयति ?

(ख) जनसंचारमाध्यमाः स्थूलतयाकतिधा विभक्तुं शक्यन्ते ?

(ग) सर्वभाषाकविसम्मेलनम् कस्मिन् अवसरे आयोज्यते ?

(घ) दूरदर्शनतः संस्कृतवार्तानां प्रथमं प्रसारणं कस्मिन् वर्षे अभवत् ?

**23** (क) पत्रपत्रिकाणां प्रकाशनाय कुत्र पंजीयनम् अनिवार्यं भवति ? **1**

(ख) पत्रकारिताव्यवसाये कः प्रमुखः घटकः भवति ? **1**

**24** (क) शोधपत्रिकाः केषां कृते उपयोगिन्यः भवन्ति ? **1**

(ख) पत्रपत्रिकासु विषयाणांसंयोजन क्रमः केन आधारेण भवति ? **1**

(ग) पत्रपत्रिकासु चित्राणां व्यवस्था कथं भवति ? **1**

(घ) पत्रपत्रिकाणां प्रकाशनाय केषां नियमानाम् अनुपालनम् आवश्यकं भवति ? **1**

(ङ) पत्रिकासु प्रकाशितलेखानां शीर्षकाणि कीदृशानि स्युः ? **1**

---